श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये एकसप्ततितमं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये एकसप्ततितमं दशकम् ॥

## केशिमथनवर्णनं, व्योमवधवर्णनं च

यत्नेषु सर्वेष्वपि नावकेशी
    केशी स भोजेशितुरिष्टबन्धुः।
त्वां सिन्धुजावाप्य इतीव मत्वा
    सम्प्राप्तवान् सिन्धुजवाजिरूपः ॥ 71.1 ॥

गन्धर्वतामेष गतोऽपि रूक्षै -
    र्नादैः समुद्वेजितसर्वलोकः।
भवद्विलोकावधि गोपवाटीं
    प्रमर्द्य पापः पुनरापतत् त्वाम् ॥ 71.2 ॥

तार्क्ष्यार्पिताङ्घ्रेस्तव तार्क्ष्य एष
    चिक्षेप वक्षोभुवि नाम पादम्।
भृगोः पदाघातकथां निशम्य
    स्वेनापि शक्यं तदितीव मोहात् ॥ 71.3 ॥

प्रवञ्चयन्नस्य खुराञ्चलं द्रा -
    गमुं च चिक्षेपिथ दूरदूरम्।
सम्मूर्च्छितोऽपि ह्यतिमूर्च्छितेन
    क्रोधोष्मणा खादितुमाद्रुतस्त्वाम् ॥ 71.4 ॥

त्वं वाहदण्डे कृतधीश्च वाहा -
    दण्डं न्यधास्तस्य मुखे तदानीम्।

तद्वृद्धिरुद्धश्वसनो गतासुः
सप्तीभवन्नप्ययमैक्यमागात् ॥ **71.5** ॥

आलम्भमात्रेण पशोः सुराणां
प्रसादके नूत्न इवाश्वमेधे।
कृते त्वया हर्षवशात् सुरेन्द्रा -
स्त्वां तुष्टुवुः केशवनामधेयम् ॥ **71.6** ॥

कंसाय ते शौरिसुतत्वमुक्त्वा
तं तद्वधोत्कं प्रतिरुध्य वाचा।
प्राप्तेन केशिक्षपणावसाने
श्रीनारदेन त्वमभिष्टुतोऽभूः ॥ **71.7** ॥

कदापि गोपैः सह काननान्ते
निलायनक्रीडनलोलुपं त्वाम्।
मयात्मजः प्राप दुरन्तमायो
व्योमाभिधो व्योमचरोपरोधी ॥ **71.8** ॥

स चोरपालायितवल्लवेषु
चोरायितो गोपशिशून् पशूंश्च।
गुहासु कृत्वा पिदधे शिलाभि -
स्त्वया च बुद्ध्वा परिमर्दितोऽभूत् ॥ **71.9** ॥

एवं विधैश्चाद्भुतकेलिभेदै -
रानन्दमूर्छामतुलां व्रजस्य।
पदे पदे नूतनयन्नसीमां
परात्मरूपिन् पवनेश पायाः ॥ **71.10** ॥

॥ इति श्रीमन्नारायणीये एकसप्ततितमं दशकं समाप्तम् ॥